संस्कृतवार्ताः

18/03/2025

सायम्  - 06:20

<u>मुख्यवार्ताः</u>

· प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोक्तं यत् प्रयागराज-महाकुम्भ: समुदीयमानस्य भारतस्य सहैव विविधतायाम् एकताया: भावनां प्रकटीकरोति।

· विदेश-मंत्री डॉ. एस.-जयशंकर: असन्तुलित-शक्ते: निराकरणार्थं निष्पक्ष-सुदृढ-अन्ताराष्ट्रिय-व्यवस्थाया: आह्वानं कृतवान् ।

· केन्द्रीय-मन्त्री प्रह्लाद-जोशी प्रोक्तवान् यत् महाराष्ट्र-सर्वकार: नागपुर-हिंसायां संलग्नान् जनान् विरुध्य कार्याचरणं करिष्यति।

· गज़ायां आरात्रिपर्यन्तं इज़राईलदेशस्य वायुसङ्घातेन चतुश्शताधिकाः जनाः मृत्युमुपगताः।

· नासा-अमेरिकी-अन्तरिक्षयात्रिणौ सुनीता-विलियम्स बुच-विल्मोर इत्येतौ गृहीत्वा ड्रैगन-अन्तरिक्षयानम् श्वः प्रातः शीघ्रमेव भूमावतरिष्यति।

· अद्य इंग्लैण्ड-देशस्य वॉल्वरहैम्पटन-नगरे कबड्डी-विश्वचषक-प्रतिस्पर्धायां भारतीयमहिला-पुरुषवर्गयो: स्पर्धा भविष्यति।

<u>महाकुम्भ</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोक्तं यत् प्रयागराज-महाकुम्भेन समुदीयमानस्य भारतस्य भावना प्रकाशिता एवमेव सम्पूर्ण-विश्वेन भारतस्य शक्तिः अवलोकिता। प्रधानमन्त्रिणा महाकुम्भमाधारीकृत्य लोकसभायां भाषणम् प्रदत्तम्।

श्रीमोदी उक्तवान् यत् यदा सम्पूर्णं विश्वं विविध-समाह्वानानि सम्मुखीकुर्वदासीत्, तदा एकतायाः भव्यप्रदर्शनेनैव राष्ट्रस्य महत्तमा शक्तिः प्रदर्शिता । तेन विविधतायामेकतायाः भावना दृढयितुं ध्यानमाकर्षितम् ।

जलसङ्ग्रहणस्य महत्वं प्रकाशयन् प्रधानमन्त्रिणा प्रोक्तं यत् भारतस्य बह्व्यः नद्यः सन्ति याः सङ्कटापन्नाः सन्ति।

तेन महाकुम्भात् प्रेरणा सम्प्राप्य नद्योत्सवस्य विस्तारार्थमपि बलं प्रदत्तम्। प्रधानमन्त्रिणा उक्तं यत् अयमुत्सवः भाविवंशं जलसङ्ग्रहणस्य महत्वविषये प्रेरयिष्यति। महाकुम्भस्य सफलतायां योगदानं प्रदत्तवद्भ्यः समेभ्योऽपि प्रधानमन्त्रिणा स्वकीयाः शुभकामनाः निवेदिताः। श्रीमोदिनः वक्तव्यानन्तरं सदसि विपक्षीसदस्यैः कोलाहलः समाचरितः। एवं प्रश्नो विहितः यत् केन नियमेन प्रधानमन्त्रिणे वक्तुं अनुमतिः प्रदत्ता। अध्यक्षेण ओम-बिरला इत्यनेन स्पष्टीकृतं यत् नियमेषु एतादृशः प्रावधानः वर्तते यत् प्रधानमन्त्री एवं केन्द्रीयमन्त्रिणश्च सदसि स्वीयवक्तव्यम् उपस्थापयितुं शक्नुवन्ति। कोलाहलस्य यथावत् प्रवर्तमाने सति अध्यक्षेण सदनस्य कार्यजातं मध्याह्नं यावत् स्थगितम्।

रायसीना-सम्वाद

विदेश-मंत्री डॉ. सुब्रह्मण्यम-जयशंकर: निष्पक्ष-सुदृढ-अन्ताराष्ट्रिय- व्यवस्थामालक्ष्य बलं प्रदत्तवान् । स: अद्य नवदिल्ल्यां रायसीना-संवादस्य सत्रं सम्बोधयन् उक्तवान् यत् सुदृढ-वैश्विक-व्यवस्थाया: अनुपस्थिति: न केवलं शक्तिशाली-देशान् उपकरोति अपितु अल्पशक्तियुतान् देशान् अपि समाह्वानानि सम्मुखीकर्तुं सशक्तान् करोति। श्रीजयशंकर: कश्मीर-राज्ये पाकिस्तानस्य अवैध-आधिपत्येन सह भारतस्य सम्प्रभुता-क्षेत्रीय अखण्डताया: उल्लेखं कृतवान्।

रायसीनासंवादे प्रवदन्त्या अमेरिकाया: राष्ट्रीय-गुप्तचर-निदेशिकया तुलसी गबार्ड इत्यनया निमन्त्रणार्थं प्रधानमन्त्रिणे नरेन्द्र-मोदिने स्वकीया कृतज्ञता प्रकटीकृता । सहैव स्वीययात्रावधौ सम्पादिताः रचनात्मकचर्चाः अपि प्रकाशिताः। गबार्ड इत्यनया प्रोक्तं यत् गतमासे वाशिङ्गटनडीसी-नगरे राष्ट्रपति-ट्रम्पस्य श्रीमोदिनः इत्यनयोः संयुक्तवक्तव्येन समुत्पन्न-गतिमनुसरन्त्या भारतीयसमकक्षैः सह संवादस्य विगत-कतिपयदिनानि रचनात्मकानि आसन्।

नागपुर

केन्द्रीय-मन्त्री प्रह्लाद-जोशी प्रोक्तवान् यत् महाराष्ट्र-सर्वकार: नागपुर-हिंसायां संलग्नान् जनान् विरुध्य कार्याचरणं करिष्यति। संसद: बहि: वार्ताहारै: सह वार्तालापं कुर्वन् जोशीवर्य: प्रोक्तवान् यत् राज्यसर्वकार: परिस्थितिं कुशलतया निर्वहति। ठाणे-नगरस्य शिवसेना इत्यस्य सांसदेन नरेश म्हास्के इत्यनेन इयं दुर्घटना विपक्षस्य षड्यन्त्रम् इति आरोपितम्। स: एतत् अपि आरोपितवान् यत् अन्वेषणे सूचना प्राप्ता यत् बहिस्स्थै: जनै: एषा हिंसा प्रसारिता। अत्रान्तरे काङ्ग्रेस-पक्षस्य सांसद: प्रमोद-तिवारी नवदिल्ल्यां संचार-माध्यमेन प्रोक्तवान् यत् नागपुरे

शान्तिः भवेत् सहैव अपराधिनंः दण्डिताः भवेयुः। शिवसेना-पक्षस्य सांसदः प्रियंका चतुर्वेदी आरोपितवती यत् नूतनसर्वकारस्य सत्तायां राज्यस्य विधि-व्यवस्था पतनाभिमुखं गच्छति।

## गज़ायाम्-इज़राइलाक्रमणम्

गज़ायां आरात्रिपर्यन्तं इज़राईलदेशस्य वायुसङ्घातेन चतुश्शताधिकाः जनाः मृत्युमुपगताः। ईज़राईलदेशस्य सेनया कथितं यत् युद्धविरामस्य वार्तायाः विफलान्तरं ते व्यापकाक्रमणं कुर्वन्तः सन्ति।

## नासा-अमेरिकी-अन्तरिक्षयात्रिणः

अन्तरिक्षयात्रिणौ सुनीता-विलियम्स बुच-विल्मोर इत्येतौ गृहीत्वा ड्रैगन-अन्तरिक्षयानम् श्वः प्रातः शीघ्रमेव भूमावतरिष्यति। एतौ यात्रिणौ नवमासादप्यधिकं कालं यावत् अन्ताराष्ट्रियान्तरिक्ष-स्थानके अवरुद्धौ आस्ताम्। एतौ प्रातः पञ्चत्रिंशदधिक-दशवादने अन्तरिक्षस्थानकात् विनिर्गतौ सहैव सप्तदशहोरात्मिकायां यात्रायां वर्तेते। नासा-संस्थया विज्ञापितं यत् यानम् प्रातः सप्तविंशत्यधिक-त्रिवादने भूमावतरणं करिष्यति।

## न्यूजीलैण्ड-प्रधानमन्त्रीयात्रा

भारत-न्यूज़ीलैण्डदेशौरक्षा-शिक्षा-क्रीडा-औद्यौगनिकी-वनविज्ञानसहितेषु पञ्चसन्धिषु हस्ताक्षरं कृतवन्तौ। उभावपि पक्षौ अधिकृतार्थिक-परिचालनपरक-पारस्परिकमान्यतासन्धीनामपि आदान-प्रदानं विहितवन्तौ। उभौ देशौ मुक्तव्यापारसन्धिमाश्रित्य सहैव विशेषज्ञ-कुशलश्रमिकाणाञ्च गतिशीलतां सौविध्ययुताञ्च विधातुं वार्तोपक्रमं समुद्घोषितवन्तौ। न्यूजीलैण्डदेशः इंडो-पैसिफिक-महासागराणां संकल्पोपक्रमे सम्मिलितः। अनेन सः आपत्प्रतिकार-आधारभूतसङ्घस्य सदस्यतामपि प्राप्नोत्। प्रधानमन्त्रिणा नरेन्द्र मोदिना ह्यः नवदिल्ल्यां न्यूजीलैण्डदेशस्य स्वीय-समकक्षेण क्रिस्टोफर-लक्सन इत्यमुना सह वार्ता साधिता। चर्चाविधौ भारत-न्यूजीलैण्डदेशयोः मध्ये विभिन्नपक्षानाश्रित्य चर्चा समभवत् । स्वीय-वक्तव्ये श्रीमोदिना प्रोदीरितं यत् तैः द्विपक्षीयसम्बन्धानां विभिन्नपक्षेषु विस्तृतचर्चा कृता सहैव उभाभ्यामपि पक्षाभ्यां सुरक्षासहयोगं दृढीकर्तुं निर्णयो विहितः । प्रधानमन्त्रिणा प्रोक्तं यत् उभयोः देशयोः मध्ये पारस्परिकरूपेण लाभयुतां मुक्तव्यापारसन्धिमालक्ष्य वार्तालापस्य निर्णयो सञ्जातः । येन परस्परव्यापारः निवेशश्च संवर्धिष्यते । स्वीये वक्तव्ये श्री लक्सन इत्येषः प्रोक्तवान् यत्

उभावपि पक्षौ पारस्परिकरूपेण लाभयुतायै मुक्तव्यापारसहभागितायै तत्परौ स्तः । तेनोदीरितं यत् न्यूजीलैण्डदेशः भारते स्वीयां राजनयिकोपस्थितिं वर्धयिष्यति।

## कबड्डी

अद्य इंग्लैण्ड-देशस्य वॉल्वरहैम्पटन-नगरे कबड्डी-विश्वचषक-प्रतिस्पर्धायां भारतीयमहिला-पुरुष-वर्गयो: स्पर्धा भविष्यति। भारतीय महिला-वर्गस्य स्पर्धा वेल्सदेशेन सह भारतीयसमयानुसारं सार्ध-पञ्चवादने समारब्धा। सहैव भारतीय-पुरुषवर्गस्य स्पर्धा स्कॉटलैण्डदेशेन सह सार्ध-दशवादने भविष्यति। ह्य: भारतेन वॉल्वरहैम्पटन-नगरे पुरुषवर्गीये द्वन्द्वे इटलीदलं चतु: षष्टि: द्वाविंशति-इत्येतै: अङ्कै: पराजित्य अनेन विजयेन सह अस्या: प्रतियोगिताया: शुभारम्भो कृत:

।। इति वार्ता:।।